**जयशङ्कर:- पूर्वोत्तरम्**

विदेशमन्त्री एस्. जयशङ्कर: प्रत्यपादयत् यत् पूर्वोत्तरभारतस्य कालान्तरे प्रासिङ्गकता वर्धिता भविष्यति। यतो हि असौ वैदेशिकै: दूतै: अस्य क्षेत्रस्य परिचयं कर्तुं स्वप्रशासनेन उद्योगै: च सह तस्य क्षेत्रस्य गुणानाम् आदानप्रदानम् कर्तुं च आग्रहं कृतवान्। आगामिने पूर्वोत्तर-निवेशक-शिखर-सम्मेलनाय पञ्चविंशत्यधिकद्विसहस्रतमवर्षाय राजदूतानाम् एकम् उपवेशनम् आभासियमाध्यमेन सम्बोधयन् डॉ जयशङ्कर: प्रोक्तवान् यत् पूर्वोत्तर-क्षेत्राणि नैकासां भारतीय-नीतिनां केन्द्रस्थाने सन्ति इति। असौ अग्रे अवोचत् यत् पूर्वोत्तरक्षेत्रम् अस्माकं पञ्च प्रतिवेशिदेशानां भूमौ स्पृष्टस्ति। एतस्य च सीमा: भारतीयोपमहाद्वीप-आसियान-इत्यनयो: मध्ये माध्यमस्वरूपा: सन्तीति।

**रक्षा-सचिव:**

रक्षासचिव: राजेशकुमारसिंह: भारत-इटली-सामरिक-सहभागित्वस्य प्रमुखस्तम्भरूपेण द्वैपाक्षिकं रक्षासहयोगं वर्धयितुं रोमनगरे इटलीदेशीयेन रक्षामन्त्रिणा ग्विडो-क्रोसेट्टो-इत्येतेन सह मिलितवान्। अयं हि स्वकीयया इटलीदेशीयया सहभागिन्या लूयिसा-रिकार्डीइत्यनया सह एकादशम्या: भारत-इटली-देशयो: वार्षिक-द्विपक्षीय-संयुक्त-रक्षा-समित्या: उपवेशनस्य सहाध्यक्षतामपि निभालितवान्। उभौ नेतारौ भारतइटलीदेशयो: मध्ये सागरीयसहयोगं सूचनादानप्रदान-व्यवस्थां समेत्य रक्षा-सुरक्षौद्योगिक सहयोगस्य अनेकेषु विषयेषु चर्चां साधितवन्तौ। रक्षा सचिव: द्वयो: दिनयो: इटलीदेशे यात्रारतोऽस्तीति।

**प्रवर्तननिदेशालय:**

प्रवर्तननिदेशालयेन दिल्ल्या: राउज-एवेन्यू-न्यायालये नेशनल-हेराल्ड-पत्रिकया सम्बद्धे धनशोधनप्रकरणे कांग्रेसनेत्रो: सोनियागांधी-राहुलगांधी-इत्यनयो: विरुद्धम् आरोपपत्रं प्रस्तुतम्। एतस्मिन् आरोपपत्रे काङ्ग्रेसदलस्य विदेशप्रमुख: सैम-पित्रोदा: सुमन-दुबे: अन्ये च सम्मिलिता: विद्यन्ते। विशिष्ट-न्यायाधीशेन विशाल-गोगने-इत्यमुना प्रकरणस्य आगामी श्रवणं अस्य मासस्य पञ्चविंशतिदिनाङ्के निर्धारितम्।

**प्रधानमन्त्रि-डेन्मार्क्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना डेन्मार्क्-देशस्य समकक्षीयेन मेट्टे फ्रेडरिक्सन् इत्यनेन सह वार्तालापः कृतः। दूरभाष- वार्तालापाधौ, उभौ नेतारौ भारत-डेन्मार्क-देशयो: हरित-सामरिकसहभागित्वाय दृढसमर्थनं पुनः दृढीकृतवन्तौ, उभयो: देशयोः जनानां हिताय विविधक्षेत्रेषु सहभागं वर्धयितुं च चर्चां कृतवन्तौ। विंशत्यधिकद्विसहस्रतमे वर्षे हरित-सामरिक-सहभागित्वस्य आरम्भानन्तरम् उभयो: देशयोः मध्ये उच्च-स्तरीय-आदानप्रदानस्य स्मरणं कुर्वन्तौ नेतारौ हरित-संक्रमणे योगदानार्थं विविधक्षेत्रेषु सहभागित्वस्य विस्तारस्य विषये अवधानं दत्तवन्तौ।

**हरदीपपुरी:**

पेट्रोलियम-प्राकृतिकवायु-मन्त्रालयेन ओपन्-एकरेज्-लाइसेन्सिङ्ग्-पॉलिसी बिड्-राउण्ड-नाइन इत्यस्य अन्तर्गतं षड्त्रिंशत्सहस्राधिकैकलक्ष-वर्गकिलोमीटर्-परिमाणाधिकक्षेत्रस्य अष्टाविंशति-खण्डानां आवण्टनम् कृतम्। अस्य महत्त्वं प्रकाशयन् प्राकृतिकवायु-मन्त्री हरदीपसिङ्ह-पुरी अवदत् यत् एतेन हि भारतस्य अप्रयुक्तां ऊर्जा-क्षमतां प्राप्तुं, आयात-अवलंबनम् न्यूनीकर्तुं च साहाय्यं भविष्यति इति। ऊर्जाक्षेत्रे अस्य दूरगामी प्रभावः भविष्यति इति सः अवदत्।

**भारत-पाकिस्तान-वक्फ**

संसदा अधिनियमितस्य वक्फ्-संशोधन-अधिनियमस्य विषये पाकिस्तानेन कृता: प्रेरिता: निराधारिता: च टिप्पण्यः भारतं दृढतया निराकृतवत्। वक्फ्-विधेयकस्य विषये पाकिस्तानस्य टिप्पणीनां विषये प्रसारमाध्यमानां प्रश्नानां प्रत्युत्तरे विदेशमंत्रालयस्य प्रवक्ता रणधीरजायसवालः अवदत् यत्, भारतस्य आन्तरिकविषये टिप्पणीकर्तुं पाकिस्तानस्य पार्श्वे अधिकारं नास्ति इति।

**आई.पी.एल्. क्रिकेट्**

आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशतिक्रिकेट्-मालिकायाम् कोलकाता-नाइट-राइडर्स-दलम् गतरात्रौ चण्डीगढनगरस्य महाराजा-यादविन्द्र-सिंह-अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गणे पञ्जाब-किंग्स-दलेन षोडश धावनाङ्कै: पराभूतम्। अद्य नवदिल्ल्याम् अरुणजेटलीक्रीडाङ्गणे डेल्हीकैपिटल्स-राजस्थान-रॉयल्स-दलयो: मध्ये स्पर्धा निर्धारितास्ति। प्रतिस्पर्धा एषा सार्ध सप्त वादने क्रीडिष्यते |

॥ इति वार्ता:॥